श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री पैयम्बाडि चेट्टलूर् सुन्दरगोपालाचार्य विरचितं

# ॥ श्री वेदान्ताचार्यदशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वेदान्ताचार्यदशकम् ॥

आचार्यपङ्क्तिमणिहारलता विभाति
श्रुत्यञ्चलार्यपरिभूषितनायकश्रीः।
नानासुगन्धसुमसङ्ग्रथिताभिरामा
संफुल्लपद्मसुभगा नवमालिकेव ॥ 1 ॥

यत्सूक्तिरद्य यतिराजवचोऽमृताब्धि -
सारप्रदानचतुरा भवतापहन्त्री।
सञ्जीवनाय जगतां भवति प्रकामं
भूत्यै स नो भवतु वेङ्कटनाथसूरिः ॥ 2 ॥

यद्ग्रन्थराशिषु तु यं कमपीह मर्त्यः
सार्थं गुरोः पठति देवसमर्चितः स्यात्।
तादृग्विशिष्टविभवो निगमान्तसूरिः
आभाति पूर्वगुरुवर्यमिलद्गुणौघः ॥ 3 ॥

वित्रासिनी कुमतिवर्गपिशाचिकानां
संरक्षिणी निगमविश्रुतसत्पथस्य।
संस्थापनी यतिपतिप्रवराशयस्य
सम्यक् विभाति निगमान्तगुरूक्तिधारा ॥ 4 ॥

सद्यः प्रफुल्लसुमसोदरशब्दमाला
सङ्गुम्भनैकनिपुणो निगमान्तसूरिः।
सञ्जीवनाय जगतां बहुसूक्तिधारां
धाराधरो जलमिव प्रववर्ष कामम् ॥ 5 ॥

क्वापि प्रकामगहनाः क्वचिदच्छसौम्याः
कुत्रापि कर्कशतमाः सरलाः क्वचिच्च।
सन्दर्भनिघ्नसुभगा वचसां विभागाः
सञ्जीवयन्ति सकलान् निगमान्तसूरेः॥ 6॥

श्रीलक्ष्मणाशयहिताः विबुधप्रमोद
संपादिकाः विमतनिग्रहबद्धदीक्षाः।
श्रीवेदमौलिगुरुवाक्ततयो विभान्ति
सौमित्रिपूर्वजशरा इव लब्धलक्ष्याः॥ 7॥

श्रीवेङ्कटाद्रिपतिमन्दिरदिव्यघण्टा
यद्भूमिकाग्रहणतः पृथुकीर्तिमाप।
श्रुत्यन्तदेशिकमणिः स हि नाथमुख्य -
सत्संप्रदायपरिरक्षणदक्ष आसीत्॥ 8॥

यत्पङ्कजास्तुतिरकिञ्चनवर्णिचित्त
तुष्ट्यै सुवर्णमयवर्षकरी बभूव।
श्रीमान् उदारहृदयो गुरुवर्यचन्द्रः
क्षेमाय वो भवतु सर्वकलाभिपूर्णः॥ 9॥

श्रीवेदमौलिगुरुसूक्तिसुधास्रवन्ती
न्यासाख्यसस्यनिवहं परिवर्धयन्ती।
श्रेयो दिशत्यविरतं शरणागतानां
लक्ष्मीसहायपदपङ्कजभोगरूपम्॥ 10॥

श्रीमानयं कुवलयोल्लसनप्रवीणः
सद्भिः सदा परिगतः प्रचुरप्रकाशः।
पूर्णः कलाभिरिह देशिकशीतभानुः
प्रोन्मूलयत्यखिलमोहमयीं तमिस्राम्॥ 11॥

सत्तर्ककर्कशनखाङ्कुशभिन्नदुष्ट -
    वादीभकुंभनिगलन्मणिहारयष्ट्या।
संभूषयन् श्रुतिवधूकुचकुम्भयुग्मं
    मोदं ददाति कवितार्किकसिंहसूरिः॥ **12** ॥

श्रीकौशिकान्वयसुधोदधिपूर्णचन्द्र -
    श्रीवासराघवसुतो गुरुभक्तिवश्यः।
आचार्यसप्तशतवर्षमहोत्सवेऽस्मिन्
    स्तोत्रं समर्पयति सुन्दरगोपनामा॥ **13** ॥

॥ इति श्री वेदान्ताचार्यदशकं समाप्तम्॥